निक्वाणः, पुं, ( नि+क्वण शब्दे+पचे घञ् । ) निक्वणः । इत्यमरः । १ । ७ । २४ ॥

निखर्व्वं, क्ली, (निखर्व्वति बहुलसंख्यां गच्छतीति । नि+खर्व्व गतौ+पचाद्यच् ।) दशखर्व्वसंख्या । दशसहस्रकोटयः । इति लीलावती हेमचन्द्रश्च ॥ ( यथा, महाभारते । २ । ६१ । ३ । "शङ्खश्चैव महापद्मं निखर्व्वं कोटिरेव च ॥" ) पुंलिङ्गोऽप्ययम् । यथा । छन्दः खर्व्वो निखर्व्वश्चेत्यादि ॥

निखर्व्वः, त्रि, ( नितरां खर्व्वः । ) वामनः । इति हेमचन्द्रः । ३ । ११८ ॥

निखिलं, त्रि, ( निवृत्तं खिलं शेषो यस्मात् । ) समस्तम् । इत्यमरः । ३ । १ । ६५ ॥ ( यथा, देवीभागवते । १ । २ । ४० ।

"निखिलमलगणानां नाशकृत् कामकन्दं
प्रकटय भगवत्या नामयुक्तं पुराणम् ॥" )

निगडः, पुं क्ली, ( निगलति बध्नातीति । नि+गल+अच् । लस्य डत्वम् । ) हस्तिनां लोहमयपादबन्धोपकरणम् । इति भरतः ॥ आँदु इति दाँड़का इति च ख्यातः ॥ तत्पर्य्यायः । शृङ्खलः २ अन्दुकः ३ । इत्यमरः । २ । ८ । ४१ ॥ हिञ्जीरः ४ अन्धुः ५ । इति शब्दरत्नावली ॥ ( यथा, माघे । ५ । ४८ ।

"बद्धापराणि परितो निगड़ान्यलावीत्
स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः ॥")

निगड़ितः, त्रि, ( नि+गल+क्तः । लस्य ड़त्वम् । यद्वा, निगड़ो जातोऽस्येति । तारकादित्वात् इतच् । ) बद्धः । इति हेमचन्द्रः । ३ । १०३ ॥

निगणः, पुं, होमधूमः । इति त्रिकाण्डशेषः ॥

निगदः, पुं, ( नि+गद भाषे+"नौ गदनदपठस्वनः ।" ३ । ३ । ६४ । इति अप् । ) भाषणम् । कथनम् । तत्पर्य्यायः । निगादः २ । इत्यमरः । ३ । २ । १२ ॥ ( यथा, भागवते । ५ । ३ । १६ ।

"इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥") उच्चैर्जपः । यथा । निगदस्तु जनैर्वेद्य इत्यागमः ॥

निगमः, पुं, ( निगमे पुर्य्यां भवः । निगम+"तत्र भवः ।" ४।३।५३ । इत्यण् । संज्ञापूर्व्वकत्वात् वृद्ध्यभावः । ) वाणिजः । ( निगम्यतेऽत्रेति । नि+गम+"गोचरसञ्चरेति ।" ३।३।११९ । इति घप्रत्ययेन साधुः । ) पुरी । कटः । ( निगम्यते ज्ञायतेऽनेनेति । ) वेदः । ( यथा, देवीभागवते । १ । ५ । ६१ ।

"कथङ्कारं वाच्यः सकलनिगमागोचरगुणप्रभावः स्वं यस्मात् स्वयमपि न जानासि
परमम् ॥" )

वणिक्पथः । हट्ट इति यावत् । इति मेदिनी । मे, ४५ ॥ निश्चयः । ( यथा, "तस्या एव प्रतिज्ञाया हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना ॥" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥ )

अध्वा । इति हेमचन्द्रः । ४ । ३८ ॥ (उपदेशः । यथा, भागवते । १ । ५ । ३६ ।

"इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम् ।
अदान्मे ज्ञानमैश्वर्य्यं स्वस्मिन् भावञ्च केशवः ॥")

निगरः, पुं, ( नि+गॄ+"ऋदोरप् ।" ३ । ३।५७ । इति भावे अप् । ) भोजनम् । इति राजनिर्घण्टः ॥

निगरणं, क्ली, ( नि+गॄ भक्षणे+भावे ल्युट् । ) भक्षणम् । इति मेदिनी । णे, ६८ ॥

निगरणः, पुं, ( निगीर्य्यते भक्ष्यतेऽनेनेति । नि+गॄ+करणे ल्युट् । ) गलः । इति मेदिनी । णे, ६८ ॥ होमधूमः । इति शब्दरत्नावली ॥

निगादः, पुं, ( नि+गद भाषे+पचे घञ् । ) कथनम् । इत्यमरः । ३ । २ । १२ ॥

निगारः, पुं, ( नि+गॄ भक्षणे+भावे घञ् । ) निगरणम् । भक्षणम् । इत्यमरः । ३ । २।३७॥

निगालः, पुं, (निगलति भक्षयत्यनेनेति । नि+गल भक्षणे+करणे घञ् । ) अश्वगलोद्देशः । इत्यमरः । २।८।४८ ॥ ( यथा, अश्ववैद्यके । २।१४ ।
"घण्टाबन्धसमीपस्थो निगालः परिकीर्त्तितः ।
अधस्ताच्च निगालस्य गलमाहुर्मनीषिणः ॥")

निगालवान्, पुं, ( निगालोऽस्यस्येति । निगाल+मतुप् मस्य वः ।) अश्वः । इति शब्दचन्द्रिका ॥

निगुः, पुं, ( निगम्यते विद्यतेऽनेनेति । नि+गम+बाहुलकात् डुः । ) मनः । इति त्रिकाण्डशेषः ॥ मलम् । मूलम् । मनोज्ञम् । चित्रकर्म्म । इति संक्षिप्तसारोणादिवृत्तिः ॥

निगूढ़ः, पुं, ( निगुह्यते संव्रियते इति । नि+गुह+क्तः । "यस्य विभाषा ।" ७ । २ । १५ । इति । नेट् । ) वनमुद्गः । इति हेमचन्द्रः । ४ । २३६ ॥ गुप्ते, त्रि । यथा,—

"आस्ते विधुः परमनिर्वृत एव मौलौ
शम्भोरिति त्रिजगतीजनचित्तवृत्तिः ।
अन्तर्निगूढ़नयनानलदाहदुःखं
जानाति कः क्षयच्छले वत शीतरश्मेः ॥"
इत्युद्भटः ॥

निग्रहः, पुं, ( नियमेन ग्रहणमिति । नि+ग्रह+"ग्रहवृदृनिति ।" ३ । ३ । ५८ । इति अप् । ) अनुग्रहाभावः । इत्यमरः । ३ । २ । ३१ ॥ ( यथा, मनुः । ७ । १७५ ।

"निग्रहं प्रकृतीनाञ्च कुर्य्याद् योऽरिबलस्य च ।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा ॥" )

बन्धनम् । ( यथा, महाभारते । १ । १।१७४ ।

"यदाश्रौषं कर्णदुर्य्योधनाभ्यां
बुद्धिं कृतां निग्रहे केशवस्य ॥" )

भर्त्सनम् । सीमा । इति मेदिनीकरहेमचन्द्रौ ॥ ( निराकरणम् । यथा, रघुः । ६ । २५ ।

"दिनमुखानि रविर्हिमनिग्रहै-
र्विमलयन् मलयन्नगमत्यजत् ॥"

दण्डः । यथा, रघुः । ११ । ५५ ।

"ते चतुर्थसहितास्त्रयो बभुः
सूनवो नववधूपरिग्रहात् ।
सामदानविधिभेदनिग्रहाः
सिद्धिमन्त इव तस्य भूपतेः ॥" )

चिकित्सा । इति राजनिर्घण्टः ॥ विष्णुः । यथा, महाभारते । १३ । १४९ । ६४ ।

"प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥"
( "सर्व्वं प्रलये निगृह्णातीति निग्रहः ।" इति शाङ्करभाष्यम् ॥ महादेवः । इति महाभारतम् । १३ । १७ । ६४ ॥ )

निग्राहः, पुं, (नि+ग्रह+"आक्रोशेऽवन्योर्ग्रहः ।" ३।३।४५ । इति घञ् । ) निग्रहः । आक्रोशः । यथा । निग्राहस्ते भूयात् । इति संक्षिप्तसारव्याकरणम् ॥ (यथा च भट्टिः । ७ । ४३ ।

"संदृश्यतान्तु वैदेह्यां निग्राहो वोऽर्थवानरैः ॥")

निघः, पुं, ( नियमितं निर्व्विशेषेण वा हन्यते ज्ञायते इति । नि+हन+"निघो निमितम् ।" ३ । ३ । ८७ । निपातनात् साधुः । ) विष्वक्समः । समन्तात् तुल्यारोहपरिणाहः । इत्यमरभरतौ ॥

निघण्टिका, स्त्री, गुलञ्चकन्दः । इति राजनिर्घण्टः ॥

निघण्टुः, पुं, ( निघण्टति शोभते इति । घण्टदीप्तौ+"मृगय्वादयश्च ।" उणां । १ । ३८ । इति कुप्रत्ययेन साधुः । ) नामसंग्रहः । इति हेमचन्द्रः । २ । १७२ ॥

निघसः, पुं, ( न्यदनमिति । नि+अद् भक्षणे+"नौ ण च ।" ३ । ३ । ६० । इति अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घस्लादेशः ।) आहारः । इत्यमरः । २ । ९ । ५६ ॥

निघातिः, स्त्री, ( निहन्यतेऽनयेति । नि+"वसिवपियजीति ।" उणां । ४ । १२४ । इति इञ् । ततः कुत्वम् । ) लोहघानी । लौहमयदण्डः । इत्युणादिकोषः ॥

निघुष्टं, क्ली, ( निघुष्यते स्मेति । नि+घुष्+भावे क्तः । ) घुष्टम् । घोषणम् । इति शब्दरत्नावली ॥

निघृष्वः, पुं, ( नि+घृषु संघर्षे+"सर्व्वनिघृष्वरिष्वेति ।" उणां । १ । १५३ । इति वन्प्रत्ययेन निपातनात् साधुः । ) खुरः । इत्युणादिकोषः ॥ वायुः । खरः । मार्गः । वराहः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ( ह्रस्वः । इति निघण्टुः । ३ । २ ॥ )

निघ्नः, त्रि, (निहन्यते निगृह्यते इति । नि+हन+घञर्थे कः । नियम्यत्वादेवास्य तथात्वम् । ) अधीनः । इत्यमरः । ३ । १ । १६ ॥ ( यथा, रघुवंशे । १४ । ५८ ।

"आश्वास्य रामावरजः सतीं ता-
माख्यातवाल्मीकिनिकेतमार्गः ।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं
देवि ! क्षमस्वेति बभूव नम्रः ॥" )

अङ्कपूरणम् । इति लीलावती ॥ ( यथा, सूर्य्यसिद्धान्ते । ३ । २६ ।

"पुनर्द्वादशनिघ्नाच्च लभ्यते यत् फलं बुधैः ॥"